अन्तिमादिषु उपान्तिमकोष्ठगवर्णग्रहणेन च उक्तदिशा पाठे द्वितीयादिपादा भवन्ति। सर्व्वतोभद्रस्येवास्य सर्व्वतोऽनुलोमविलोमपाठासम्भवेन अर्धभ्रमत्वम् अयञ्च बन्धः अनुष्टुप्छन्दस्येव नान्यत्र छन्दसीति ज्ञेयम्। एवम् "अभीकमतिकेनेद्धे भीतानन्दस्य नाशने। कनत्सकामसेनाके मन्दकामममकस्यति" माघश्लोकोऽपि ज्ञेयः।

**अर्द्धमाणवक** पु० अर्धं माणवकस्य। द्वादशलतिके हारभेदे माणवकारस्य चतुर्विंशतिलतिकत्वात्तस्याधमानतयास्य तथात्वम्।

**अर्द्धमात्रा** स्त्री अर्धं मात्रायाः। विन्दर्धचन्द्राकारव्यञ्ज्यायां १ब्रह्मरूपायाम् वाचि २तद्वाच्यायां देव्याञ्च। "अर्धमात्रा स्थिता नित्यं यानुच्चार्य्या विशेषतः" देवीमा० "अकारो भगवान् ब्रह्मा उकारो विष्णुरुच्यते मकारो भगवान् रुद्रोऽप्यर्धमात्रा महेश्वरी। उत्तरोत्तरभावेनाप्युत्तमत्वं स्मृतं बुधैः। अतः सर्व्वेषु शास्त्रेषु देवीसर्व्वोत्तमा स्मृता" देवीपुरा०। अर्धमात्रा उच्चारणकालोऽस्य। ३हल्वर्णे त्रि० "व्यञ्जनं चार्धमात्रक"मित्युक्तेस्तथात्वम्।

**अर्द्धमास** पु० अर्धं मासस्य एकदे०त०। पञ्चदशाहात्मके मासस्यार्धरूपे पक्षात्मके काले "दर्शेन चार्धमासान्ते पौर्णमासेन चैव हि" मनुः "पञ्चदश वा अर्धमासस्य रात्रयः" इति शत०ब्रा०। "तत्त्रिंशता भवेन्मास" इत्युक्तेर्मासस्य त्रिंशत्तिथ्यात्मकतया तदर्धस्य पञ्चदशत्वम् "ऐरण्डतैलं वा मासमर्धमासं वा पाययेत्" सुश्रुतः।

**अर्द्धयाम** पु० अर्द्धं यामस्य प्रहरस्य। दिनरात्रयोः अष्टधा विभक्ते काले यावद्दिनमानं रात्रिमानं वा तस्याष्टधाविभागे यः कालस्तस्मिन्। तस्यैव वारवेलाकालवेलासंज्ञा तस्य च वारविशेषेषु वर्ज्यता ज्योतिषोक्ता। "कृतमुनियमशरमङ्गलत्तुभास्करादियामार्द्धे। प्रभवति वारवेला न शुभा शुभकार्य्यकरणाय"। ज्यो०त० तथाच रवौ चतुर्थोऽर्द्धयामः वारवेला एवं चन्द्रे सप्तमः। कुजे द्वितीयः, बुधे पञ्चमः, गुरौ अष्टमः, भृगौ तृतीयः, शनौ षष्ठः वारवेला। "कालस्य वेला रवितः शराग्निकाब्जानलागाब्धयो गजेन्द्र दिने, निशायामृतुवेदनेत्रनगेषुरामा विधुदन्तिनौ च" ज्यो० त०। यथा दिने रवौ पञ्चमः कालवेला एवं चन्द्रे द्वितीयः, कुजे षष्ठः, बुधे तृतीयः, गुरौ सप्तमः, भृगौ चतुर्थः, शनौ अष्टमः आद्यश्च॥ रात्रौ रवौ षष्ठः कालवेला। एवं चन्द्रे चतुर्थः। कुजे द्वितीयः। बुधे सप्तमः, गुरौ पञ्चमः भृगौ तृतीयः, शनौ आद्यः अष्टमश्च कालवेला॥ एवं दिने वारवेलाकालवेलाद्वयसमावेशेन द्वयोर्वर्ज्जनता यथोक्तं "रवौ वर्ज्यं चतुःपञ्च सोमे सप्त द्वयं तथा। कुजे षष्ठं द्वितीयञ्च बुधे बाणतृतीयकम्। गुरौ सप्ताष्टकञ्चैव त्रिचत्वारि च भार्गवे। शनावाद्यं च षष्ठञ्च अष्टमं परिवर्जयेत्"॥ एवञ्च रात्रौ न वारवेला किन्तु कालवेलैव। तद्दोषोऽप्युक्तः "यात्रायां मरणं काले (कालवेलायाम्) वैधव्यं पाणिपीडने। व्रते ब्रह्मबधः प्रोक्तः सर्व्वं कर्म्म ततस्त्यजेत्" ज्यो०त०। दिनविशेषे तद्दोषविशेषोऽपि ज्यो०त० उक्तः। "वारेशादर्द्धयामेषु रात्र्यह्नोः पञ्च षट् क्रमात्। अधिपाःस्युर्ग्रहास्तत्र यथार्काह्ने भवन्ति हि। रवीज्येन्दुभृगुज्ञाजशनिच्चरवयो निशि। रविशुक्रज्ञरात्रीशशनीज्यकुजभास्कराः। दिने तुहग्रा : परेष्वेवम्" अयमर्थः यस्मिन् दिवसे यो वारेशः सएव प्रथमयामार्द्धाधिपः। ततो द्वितीयेशस्तु रात्रौ वारेशापेक्षया पञ्चमः, पुनस्तदपेक्षया पञ्चमस्तृतीयेश एवं क्रमेण ज्ञेयः। दिने तु वारेश एव आद्याधिपः द्वितीयेशस्तु वारेशापेक्षया षष्ठस्तदपेक्षया पुन षष्ठस्तृतीयेश इत्येवंक्रमेण ज्ञेयः॥ एतञ्च पताकीवेधे पापस्वामिकस्य रिष्टसूचकताविवेचनार्थम् अन्यत्र शुभकर्म्मसु वर्जनार्थञ्च।

**अर्द्धरथ** पु० रथोऽस्त्यस्य अच् रथः रथी अर्द्धः असंपूर्णोरथः। असम्पूर्णे रथिनि। "सखा ते दयितो नित्यं य एष रणकर्कशः। उत्साहयति राजंस्त्वां विग्रहे पाण्डवैः सह। एष विकत्थनो नीचः कर्णोवैकर्त्तनस्तव। मन्त्री नेता च बन्धुश्च मानी चात्यन्तमुच्छ्रितः। एष नैव रथः कर्णो न चाप्यतिरथो रणे। वियुक्तः कवचेनैष सहजेन विचेतनः। कुण्डलाभ्याञ्च दिव्याभ्यां वियुक्तः सततं घृणी। अभिशापाच्च रामस्य ब्राह्मणस्य च भाषणात्। करणानां वियोगाच्च तेन मेऽर्द्धरथोमतः। नैष फाल्गुनमासाद्य पुनर्जीवन् विमोक्ष्यते। ततोऽब्रवीत् पुनर्द्रोणः सर्व्वशस्त्रभृतां वरः। एवमेतत् यथात्थ त्वं न मिथ्याऽस्ति कदाचन। रणेरणेऽभिमानी च विमुखश्चापि दृश्यते। घृणी कर्णः प्रमादी च तेन मेऽर्द्धरथो मतः" इति भा० उ०प०।

**अर्द्धरात्र** अर्द्धं रात्रेः अच् समा०। रात्रेस्तुल्यार्द्धभागे यामद्वयपूर्त्तिकाले "अर्द्धरात्रे त्वसम्पूर्णे दिवा पुण्यमनागतम्" "अर्द्धरात्रे व्यतीते तु विज्ञेयं चापरेऽहनि" "सम्पूर्णे चार्द्धरात्रे चेति" च देवी पु०। "कलान्यूनार्द्धरात्रे तु यदि संक्रमणं भवेत्" गर्गः। "अर्द्धरात्रे कलाधिक्ये यदा संक्रमते रविः"। "अर्द्धरात्रे तु संपूर्णे यदा संक्रमते रविः भु०भी०। "पूर्णे चेदर्द्धरात्रे तु रविसंक्रमणं भवेत्"